# अष्टम: पाठ: प्रत्यया:

## अभ्यासः

1. शतृप्रत्ययं योजयित्वा वाक्यपूर्तिं कुरुत-

(i) **धावन्तः** धावकाः यशः प्राप्नुवन्ति।(धाव्+शत)
(ii) वस्त्राणि **नयन्** रजकः श्रान्तः भवति।(नी+शतृ)
(iii) जलं **पिबन्तौ** तृषार्तौ सन्तुष्टौ स्तः।(पिब्+शतृ)
(iv) कथां **श्रावयन्** महिला शिशुं शाययति।(श्रु+शतृ)
(v) कार्यं **कुर्वन्त्यः** स्त्रियः गीतं गायन्ति।(कृ+शत)

**2. शानच्प्रत्ययं योजयित्वा वाक्यपूर्तिं कुरुत-**

(i) गुरुं सेव्+शानच् **सेवमानाः** छात्राः सफलतां लभन्ते।
(ii) कष्टं सह्+शानच् **सहमानाः** जनाः दुःखिनः भवन्ति।
(iii) सत्यं ब्रू+शानच् **ब्रुवाणाः** नराः सम्मानं प्राप्नुवन्ति।
(iv) तस्य वृध+शानच् **वर्धमानः** प्रगतिः पितरं हृष्यति।
(v) मुद्+शानच् **मोदमाना** बालिका नृत्यति।

## अभ्यासः

**1. रिक्तस्थानानि पूरयत-**

(i) रामेण पाठः **लेखितव्यः।** (लिख्+तव्यत्)
(ii) लतया पुष्पाणि न(**त्रोटयितव्यानि**) | (त्रुट्+तव्यत्)
(iii) त्वया जलं वृथा न **कर्त्तव्यम्।** (कृ+तव्यत्)
(iv) त्वया उच्चैः न **वक्तव्यम्।** (वद्+तव्यत्)
(v) अस्माभिः बहिः **भ्रमितव्यम्।** (भ्रम्+तव्यत्)
(vi) सर्वैः सत्यं **वक्तव्यम्।** (वद्+तव्यत्)
(vii) युष्माभिः सन्तुलितभोजनम् एव **खादितव्यम्।** (खाद्+तव्यत्)
(viii) अमितेन अवश्यमेव तत्र **गन्तव्यम्।** (गम्+तव्यत्)
(ix) नकुलेन पाठाः **पठितव्यः।** (पठ्+तव्यत्)
(x) तैः धर्मः **पालितव्यः।** (पाल्+तव्यत्)

2. कोष्ठकप्रदत्तशब्दैः सह उचितां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत-

(i) **अस्माभिः** एतत् कार्यं कर्त्तव्यम्। (अस्मद्)
(ii) **युष्माभिः** खगाः रक्षणीयाः। (युष्मद्)
(iii) **नमितेन** पाठः पठितव्याः। (नमित)
(iv) **सर्वैः** अनुशासनं पालयितव्यम्। (सर्व)
(v) **सैनिकैः** देशरक्षा कर्त्तव्या। (सैनिक)
(vi) **जनैः** मधुरं वक्तव्यम्। (जन)

www.ncertsolutionhub.in

(vii) **श्रमिकैः** परिश्रमः कर्तव्यः। (श्रमिक)
(viii) **अध्यापकैः** नियमाः पालयितव्याः। (अध्यापक)
(ix) **शिक्षकेन** मनसा पाठयितव्यम्। (शिक्षक)
(x) **तेन** लेखौ लिखितव्यौ। (तत्)

**3. कोष्ठकप्रदत्तशब्दैः सह उचितां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत-**

(i) न्यायाधीशेन **न्यायः** कर्तव्यः। (न्याय)
(ii) त्वया **पौष्टिकभोजनं** खादितव्यम्। (पौष्टिकभोजन)
(iii) सर्वैः प्रातः **भ्रमणं** कर्तव्यम्। (भ्रमण)
(iv) तेन **कथाः** पठितव्याः। (कथा)
(v) अस्माभिः **पाठाः** स्मर्तव्याः। (पाठ)
(vi) युष्माभिः **सुचरितानि** एव सेवितव्यानि। (सुचरित)
(vii) जनैः **सुकार्याणि** एव कर्तव्यानि। (सुकार्य)
(viii) छात्रैः **प्रश्नाः** प्रष्टव्याः। (प्रश्न)
(ix) बालैः **जलं** न दूषयितव्यम्। (जल)
(x) युष्माभिः **पुष्पाणि** न त्रोटयितव्यानि। (पुष्प)

**1. अधोलिखितानि वाक्यानि पठित्वा 'अनीयर्' प्रत्यययुक्तपदानि चित्वा समक्षं लिखत-**

| | पदानि |
|---|---|
| (i) अस्माभिः धर्मः आचरणीयः। | **आचरणीयः** |
| (ii) जनैः परिश्रमः करणीयः। | **करणीयः** |
| (iii) सर्वैः पर्यावरणस्य रक्षा करणीया। | **करणीया** |
| (iv) बालैः नियमाः पालनीयाः। | **पालनीयाः** |
| (v) त्वया एषः पाठः पठनीयः। | **पठनीयः** |
| (vi) सर्वैः समयस्य अनुपालनं। | **कर्तव्यम्** |
| (vii) त्वया कदापि वृथा न वदनीयम्। | **वदनीयम्** |
| (viii) अनेन एतत् न करणीयम्। | **करणीयम्** |
| (ix) अस्माभिः दूषितं जलं न पानीयम्। | **पानीयम्** |
| (x) युष्माभिः पर्युषितम् अन्नं न खादनीयम्। | **खादनीयम्** |

**2. अधोलिखितेषु वाक्येषु 'अनीयर्' प्रत्यययुक्तानि पदानि इति (✓) चिहेन चिह्नितं कुरुत-**

| | | |
|---|---|---|
| (i) मनसा सततं | ✓ | स्मरणीयम् |
| (ii) वचसा सततं | ✓ | वदनीयम् |
| (iii) लोकहितं मम | ✓ | करणीयम् |
| (iv) न भोगभवने | ✓ | रमणीयम् |
| (v) न सुखशयने | ✓ | शयनीयम् |
| (vi) अहर्निशं | ✓ | जागरणीयम् |

www.ncertsolutionhub.in

(vii) लोकहितं मम ✓ करणीयम्
(viii) न जातु दुःखं ✓ गणनीयम्
(ix) न च निजसौख्यं ✓ मननीयम्
(x) कार्यक्षेत्रे ✓ त्वरणीयम्
(xi) लोकहितं मम ✓ करणीयम्
(xii) दुःखसागरे ✓ तरणीयम्
(xiii) कष्टपर्वते ✓ चरणीयम्
(xiv) विपत्तिविपिने ✓ भ्रमणीयम्
(xv) लोकहितं मम ✓ करणीयम्
(xvi) सदा मया ✓ सञ्चरणीयम्
(xvii) लोकहितं मम ✓ करणीयम्

**3. कोष्ठकप्रदत्तपदैः सह उचितां विभक्तिं प्रयुक्त रिक्तस्थानानि पूरयत-**

(i) युष्माभिः प्रातः उत्थाय **पठनीयम्**। (पठ्+अनीयर्)
(ii) जनैः सर्वदा सर्वेषां कल्याणं **करणीयम्।** (कृ+अनीयर्)
(iii) अस्माभिः सुकार्याणि **कर्तव्यानि**। (कृ+अनीयर्)
(iv) सर्वै: ईशवन्दना **स्मरणीया** (स्मृ+अनीयर्)
(v) त्वया मधुराणि वचनानि **वदनीयानि**। (वद्+अनीयर्)
(vi) सैनिकैः दुःखं न **गणनीयम्**। (गण्+अनीयर्)
(vii) अस्माभिः धर्मः **आचरणीयः।** (आ+चर्+अनीयर्)
(viii) त्वया वृथा न **वदनीयम्**। (घच्+अनीयर्)
(ix) जनैः प्रातः **जागरणीयम्**। (जागृ+अनीयर्)

**4. उदाहरणानुसारं लिखत-**

| शब्द | लिंग | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| हसनीय | पुल्लिङ्गे | हसनीयः | हसनीयौ | हसनीयाः |
| | स्त्रीलिङ्गे | हसनीया | हसनीये | हसनीयाः |
| | नपुंसकलिङ्गे | हसनीयम् | हसनीये | हसनीयानि |
| पठनीय | पुल्लिङ्गे | पठनीयः | पठनीयौ | पठनीयाः |
| | स्त्रीलिङ्गे | पठनीया | पठनीये | पठनीयाः |
| | नपुंसकलिङ्गे | पठनीयम् | पठनीये | पठनीयानि |
| पानीय | पुल्लिङ्गे | पानीयः | पानीयौ | पानीयाः |
| | स्त्रीलिङ्गे | पानीया | पानीये | पानीयाः |
| | नपुंसकलिङ्गे | पानीयम् | पानीये | पानीयानि |
| ग्रहणीय | पुल्लिङ्गे | ग्रहणीयः | ग्रहणीयौ | ग्रहणीयाः |
| | स्त्रीलिङ्गे | ग्रहणीया | ग्रहणीये | ग्रहणीयाः |
| | नपुंसकलिङ्गे | ग्रहणीयम् | ग्रहणीये | ग्रहणीयानि |

www.ncertsolutionhub.in

## अभ्यास

**1. अधोलिखितवाक्येषु समुचिपदेन रिक्तस्थानपूर्तिं कुरुत-**

(i) (बल+इन्) **बलिनः** जनाः निर्बलेषु बलप्रयोगं न कुर्युः।
(ii) रथिनम् **(रथ+इन्)** जनम् वार्तायां मग्नं न कर्तव्यम्।
(iii) शिल्पिन्यः **(शिल्पि+इन्)** बालिकाः कुत्र गताः?
(iv) दण्डिनि **(दण्डिन+इन्)** जने न विश्वसिहि।
(v) (कर+इन्) **करी** वने वसति।
(vi) धनिनः **(धन+इन्)** गर्विताः न भवेयुः।
(vii) सीता अवदत्-अहम् **(कुशली)** (कुशल+इन्) अस्ति।
(viii) बलिनौ **(बल+इन्)** अपमानं न सहेते।
(ix) **(गुण+इन्)** गुणिना जनेन एतत् कार्यं सुष्ठु कृतम्।
(x) दण्डिनः **(दण्डिन+इन्)** दण्डं धारयन्ति।

**2. प्रदत्तशब्देषु मतुप् अथवा वतुप् प्रत्ययस्य यथापेक्षितं रूपं संयुज्य/वियुज्य लिखत-**

(i) बुद्धिमती **(बुद्धि+मतुप)** नारी प्रशस्यते।
(ii) एतौ छात्रौ (शक्ति+मतुप्) **शक्तिमन्तौ** स्तः।
(iii) ताः कन्याः गुणवत्यः **(गुण+वतुप)** सन्ति।
(iv) लक्ष्मीवान् **(लक्ष्मी+वतुप)** लक्ष्म्याः आदरं कुर्यात्।
(v) **धनवन्तः** (धन+वतुप) जनाः दरिद्राणां सहायतां कुर्वन्तु।
(vi) सत्यवत्यै **(सत्य+वतुप)** नार्यै पुस्तकं यच्छ।
(vii) (सत्य+वतुप) **सत्यवद्भिः** जनैः सदा सत्यभाषणं क्रियते।
(viii) बलवता **(बल+वतुप)** जनेन निर्बलेषु बलं न प्रयोक्तव्यम्।
(ix) (शक्ति+मतुप) **शक्तिमत्या** नार्या इदं कार्यं कृतम्।
(x) गुणवद्भिः **(गुण+वतुप)** छात्रैः ध्यानेन पठ्यते।

## त्व- तल् -प्रत्ययौ

शिक्षकः = एतं श्लोकं पठत-
विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते॥
अत्र 'विद्वत्त्वम्, नृपत्वम्' इति पदयोः कस्या प्रत्ययस्य प्रयोगः?
छात्राः = गुरुवर! न जानीमः वयम्। कृपया बोधयतु।
शिक्षकः = अत्र भाववाचकस्य त्व' इति प्रत्ययस्य प्रयोगः।

**विद्वस् + त्व = विद्वत्त्वम्**
**नृप + त्व नृपत्वम्**

'त्व' प्रत्ययस्य प्रयोगः इत्येवं क्रियते
अस्य प्रत्ययस्य प्रयोगेण शब्दः नपुंसकलिङ्गेः भवति। अतः शब्दरूपं 'फलम्' इति शब्दवत् निर्मीयते।

www.ncertsolutionhub.in

उमेशः = यथा दीर्घत्वम्।
शिक्षकः = आम् शोभनम्। एवमेव अन्यशब्दानपि निर्माय वदन्तु।
महेशः = लघुत्वम्, महत्त्वम्
शिक्षकः = अतिशोभनम्। अधुना एतां पङ्क्तिं पठत-का जडता? पाठतोऽप्यनभ्यासः। अर्थात् यदि पठितस्य अभ्यासः न क्रियते तर्हि जडता आयाति। अत्र भाववाच्ये एव तल् प्रत्ययः प्रयुक्तः।
रहीमः = किं त्व, तल् च द्वावेव भाववाचकौ प्रत्ययौ?
शिक्षकः = आम् सम्यगवगतम्।
रमेशः = तर्हि किमन्तरं द्वयोः मध्ये?
शिक्षकः = अन्तरं केवलं लिङ्गप्रयोगस्य एव।
छात्राः = कथमिव?
शिक्षक: = तल् प्रत्ययस्य प्रयोगेण शब्दः स्त्रीलिङ्गः भवति। यथा जडता, दीर्घता, लघुता, महत्ता इत्यादिप्रकारेण तल् प्रत्यययुतस्य शब्दस्य रूपाणि 'बालिका' शब्दवत् भवन्ति।

**इदानीमस्याः तालिकायाः माध्यमेन अवगच्छामः:-**

| | | | |
|---|---|---|---|
| लघु | = | **लघुता** | **लघुत्वम्** |
| महत् | = | **महत्ता** | **महत्वम्** |
| दीर्घ | = | **दीर्घता** | **दीर्घत्वम्** |
| गुरु | = | **गुरुता** | **गुरुत्वम्** |
| पवित्र | = | **पवित्रता** | **पवित्रत्वम्** |

छात्राः = तालिकां पूरयन्ति।
शिक्षकः = अधुना वाक्येषु एतयोः अभ्यासं कुर्मः।

**अधः प्रदत्तवाक्येषु त्व/तत्-प्रत्ययस्य संयोजनं/वियोजनं वा कृत्वा रिक्तस्थानानि पूरयत-**

(i) कृष्णसुदाम्नोः मित्रता **(मित्र+तल्)** विश्वप्रसिद्धा।
(ii) विद्वत्वम् **(विद्वान+त्व)** च नृपत्वम् **(नृप+त्व)** च नैव तुल्यम्।
(iii) कार्येषु दीर्घसूत्रता **(दीर्घसूत्र+तल्)** कदापि न कर्तव्या।
(iv) आकारस्य (लघु+त्व) **लघुत्वं** कार्यबाधकः न भवेत्।
(v) पशवः स्वपशुत्वम् **(स्वपशु+त्व)** तु दर्शयन्ति एव।
(vi) वेदानां (महत्+त्व) **महत्वं** को न जानाति।
(vii) गङ्गायाः पवित्रता **(पवित्र+तल्)** जगत्प्रसिद्धा।
(viii) मूर्खः स्वमूर्खतां **(स्वमूर्ख+तल्)** सभायां न प्रदर्शयेत्।
(ix) नदीनां (दीर्घ+तल्) **दीर्घता** चिन्तनात् परः विषयः।
(x) मित्रेण सह मित्रत्वम् **(मित्र+त्व)** कदापि न त्याज्यम्।

www.ncertsolutionhub.in

## अभ्यास

1. अधोलिखितेषु कोष्ठकप्रदत्तशब्दैः सह 'ठक्' प्रत्ययस्य प्रयोगं कृत्वा रिक्तस्थानानि पूरयत-

(i) **धार्मिकाः** (धर्म+ठक्) जनाः धर्मम् एव आचरन्ति।

(ii) अद्य **वार्षिकः** (वर्ष+ठक्) परीक्षापरिणामः प्राप्स्यते।

(iii) अद्य वयं **ऐतिहासिकानि** (इतिहास+ठक्) स्थलानि द्रष्टुं गच्छामः।

(iv) **प्राथमिकी** (प्रथम+ठक्) शिक्षा बाल्यतः एव भवति।

(v) **सैनिकाः** (सेना+ठक्) देशं रक्षन्ति।

(vi) अधुना **आध्यात्मिकी** (अध्यात्म+ठक्) शिक्षा अनिवार्या।

(vii) **नागरिकाः** (नगर+ठक्) एव देशम् उन्नयन्ति।

(viii) एताः **वैज्ञानिकाः** (विज्ञान+ठक्) चिन्तायां मग्नाः सन्ति।

**2. 'ठक्' प्रत्यययुक्तपदानि चित्वा लिखत- 'ठक्' प्रत्यययुक्तपदानि-**

| | |
|---|---|
| (i) भौतिकी उन्नतिरपि अनिवार्या। | **भौतिकी** |
| (ii) अधुना वार्षिकं कार्यं सम्पन्नम्। | **वार्षिकं** |
| (iii) सैनिकाः देशम् उन्नयन्ति। | **सैनिकाः** |
| (iv) दैविकी विपदा कष्टकरी भवति। | **दैविकी** |
| (v) एषः सार्वभौमिकः सिद्धान्तोऽस्ति। | **सार्वभौमिकः** |
| (vi) सार्वकालिकाः उपदेशाः एते। | **सार्वकालिकाः** |
| (vii) सामाजिकं कार्यम् एव एतत्। | **सामाजिकं** |
| (viii) वैज्ञानिकाः अन्वेषणे रताः भवन्ति। | **वैज्ञानिकाः** |
| (ix) भारतस्य भौगोलिकी स्थितिः सुन्दरा अस्ति। | **भौगोलिकी** |
| (x) एषा कवेः मौलिकी कृतिः। | **मौलिकी** |

## अभ्यास

1. शुद्धं विकल्पं चित्वा रिक्तस्थानानि पूरयत-

(i) इयं **छात्रा** पठति। (छात्रः/छात्रा)

(ii) बालिकासु **प्रथमा** अध्ययनशीला अस्ति। (प्रथमः/प्रथमा)

(iii) शोभनानां भोजनानां **दात्री** भव। (दातृ/दात्री)

(iv) एषा **तपस्विनी** हवनं करोति। (तपस्वी/तपस्विनी)

(v) गङ्गा एका **नदी** अस्ति। (नद/नदी)

**2. कोष्ठप्रदत्तपदानां समुचितं प्रयोगं कुर्वन्तः/कुर्वन्त्यः रिक्तस्थानानि पूरयत-**

**मञ्जूषा**

**श्रीमती, प्राध्यापिका, नदी, तपस्विन्या, नदीम्, प्रथमा, मातुलानी, बालिकाः, गच्छन्ती, मेधाविनी, छात्राः**

(i) इयम् एका **नदी** अस्ति।

(ii) **नदीम्** परितः वृक्षाः सन्ति।

(iii) **तपस्विन्या** सह तस्य पुत्रः अपि प्रवचनं करोति।

(iv) एताः **बालिकाः** सन्ति।

www.ncertsolutionhub.in

(v) ताः सर्वाः **छात्राः** सन्ति।
(vi) **प्रथमा** वाचाला अस्ति।
(vii) ग्रामं **गच्छन्ती** श्रमिका श्रान्ता अस्ति।
(viii) एषा बालिका **मेधाविनी** अस्ति।
(ix) मम **मातुलानी** विदेशं गच्छति।
(x) **श्रीमती** रमा एका **प्राध्यापिका** अस्ति।

**3. अधोलिखिते अनुच्छेदे रेखाङ्कितपदानि स्त्रीलिङ्गे परिवर्त्य अनुच्छेदं पुनः लिखत-**

एक: **बालक**: ग्रामे वसति। **सः** विद्यालयं गच्छति। तेन सह तस्य भ्राता अपि गच्छति। तस्य **शिक्षकः** तं प्रेम्णा पाठयति। विद्यालये **अनेके** छात्राः सन्ति। **तेषु एकः** अत्यधिकः मेधावी अस्ति।
उत्तर: **एका बालिका ग्रामे वसति। सा विद्यालयं गच्छति। तया सह तस्याः भ्राता अपि गच्छति। तस्याः शिक्षकः तां प्रेम्णा पाठयति। विद्यालये अनेकाः छात्राः सन्ति। तासु एका अत्यधिका मेधाविनी अस्ति।**

www.ncertsolutionhub.in